16-09-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । हितोपदेशः ।

श्लोकव्याख्या ।

"शरीरस्य, गुणानां च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि, कल्पान्तस्थायिनो गुणाः ।

प्रस्तुतोऽयं श्लोकः श्रीनारायणपण्डितेन विरचितस्य हितोपदेशग्रन्थस्य मित्रलाभभागात् गृहीतोऽस्ति । स्वपरिवारेण सह पाशबद्धः चित्रग्रीवः कपोतराजः स्वमित्रं हिरण्यकं समीपमागतः । हिरण्यकः मूषकराजः प्रथमं तु चित्रग्रीवस्य बन्धनं छेत्तुमिच्छति किन्तु चित्रग्रीवः तम् अपवारयन् अकथयत् यथाशक्त्येषां कपोतानां बन्धनं खण्डय यतोहि एते सर्वे ममाश्रिताः । यदि अनित्येन मलवाहिना कायेन यशः लभ्यते ततः सर्वाणि प्राप्यते जनः ।

अन्वयः → अत्यन्तं दूरम् अन्तरं शरीरस्य गुणानां च । शरीरं क्षणविध्वंसि (किन्तु) गुणाः कल्पान्तस्थायिनः (भवति) ।

शब्दार्थः व्याकरणञ्च → अत्यन्तं दूरम् = नितरां विप्रकृष्टम् । अन्तरम् = प्रभेदः । क्षणविध्वंसि = अचिरविनाशि । गुणाः = दयादाक्षिण्यादयः । कल्पान्तस्थायिनः = प्रलयपर्यन्तस्थिराः ।

विशेषः → शरीरगुणयोर्मध्ये महदन्तरम् । शरीरं क्षणभङ्गुरं भवति किन्तु यशः प्रलयकालपर्यन्तस्थायिनः भवति यतोहि नास्ति येषां यशः काये जरामरणजं भयम् ।
अस्मिन् श्लोके अर्थान्तरन्यासालङ्कारः अनुष्टुप् छन्दश्च ।

[signature] 16-09-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

16-09-2020

संस्कृतसामान्यम्। उपशास्त्री II

अनिवार्यपत्रम्। प्रश्नपत्रस्वरूपम्। 2018-2020

1. 'अति देवान् कृष्णः।' अस्मिन् वाक्ये देवान् पदे कस्मात् सूत्रात् द्वितीया विभक्तिः अभवत् ?

2. 'अकथितं च' सूत्रस्य व्याख्यां सोदाहरणेन कुरुत।

3. नमः योगे चतुर्थी किन्तु 'सः गुरुं नमस्करोति', अस्मिन् वाक्ये गुरुं पदे द्वितीया विभक्तिः कथं भवेत् ?

4. निम्नांकितानां सूत्राणां उदाहरणानि दत्त।

भुवः प्रभवश्च। भीत्रार्थानां भयहेतुः। जुगुप्साविरामप्रमादार्थानाम्। यस्य च भावेन भावलक्षणम्। यतश्च निर्धारणम्। षष्ठी चानादरे। वारणार्थानाम् ईप्सितः। धारेरुत्तमर्णः। स्पृहेरीप्सितः। रुच्यर्थानां प्रीयमाणः। अपवर्गे तृतीया। कालाध्वनोरत्यन्त संयोगे। अनुक्ते कर्तरि। येनाङ्गविकारः। उपान्वध्याङ्वसः। अधि शीङ् स्थासां कर्म। उक्ते कर्मणि।

5. कर्मकारकस्य परिभाषासूत्रं दत्त।

6. करणसंज्ञाविधायकसूत्रं लिखत।

7. सम्प्रदानसंज्ञा कस्य पदस्य भवति ?

8. सम्बन्धः कारकं भवितुमर्हति न वा ? कथं ?

9. 'वनमुपवसति' तथा 'वने उपवसति' मध्ये किमन्तरम् ?

10. कर्मवाच्ये एकं वाक्यं लिखत।

11. 'यावत्' पदस्य प्रयोगं वाक्ये कुरुत।

(signature) 16-09-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

16-09-2020

साहित्यम् । शास्त्री

## छन्दविचारः ।

द्रुतविलम्बितछन्दः → "द्रुतविलम्बितमाह नभौ भरौ।"

(12) बारह अक्षर वाले इस छन्द के प्रत्येक पाद या चरण में क्रमशः नगण, दो भगण तथा एक रगण हो। इस छन्द के प्रत्येक चरण में चौथा, सातवाँ, दसवाँ तथा बारहवाँ अक्षर गुरु तथा शेष अक्षर लघु होता है। इस छन्द के पादान्त में यति होती है। इस छन्द को विद्वान् लोग द्रुतविलम्बित या सुन्दरी छन्द भी कहते हैं।

| | नगण | भगण | भगण | रगण |
|---|---|---|---|---|
| | I I I | S I I | S I I | S I S |
| यथा → | द्रु त ग | तिः पु रु | बो ध न | भा ज नं , |
| | भ व ति | म न्द ग | ति श्च सु | खो चि तः । |
| | द्रु त वि | ल म्ब त | खे ल ग | ति र्नृ पः , |
| | स क ल | रा ज्य सु | खं प्रि य | म श्नु ते ॥ |
| अपिच → | न ग ण | भ ग ण | भगण | र ग ण |
| | I I I | S I I | S I I | S I S |
| | इ त र | पा प फ | ला नि य | दृ च्छ या , |
| | वि त र | ता नि स | हे च तु | रा न न । |
| | अ र सि | के षु क | वि त्व नि | वे द नं , |
| | शि र सि | मा लि ख | मा लि ख | मा लि ख ॥ |

(हस्ताक्षर) 16-09-2020

डॉ निर्मल कुमार झा, (स० प्राचार्य:)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।